# पवमान सूक्तम् (पुण्याहवाचनम्)

*तैत्तरीय संहिता, काण्डं ५, प्रपाठक ६, अनुवाक्य १*

*तैत्तरीय ब्राह्मणं, अष्टकं १, प्रश्नः ४, अनुवाक्य ८*

ॐ ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपास्तान आपश्शग्ग् स्योना भवन्तु ॥ यासाग्ं राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम् । मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शग्ग् स्योना भवन्तु ॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति । याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शग्ग् स्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोप स्पृशत त्वचं मे । सर्वाग्ं अग्नीग्ं रप्सुषदो हुवे वो मयिवर्चो बलमोजो निधत्त ॥पवमानस्सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूग्ं रनु । यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे । उभाभ्यां देवसवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे । वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वेस्तनुवो वीतपृष्ठाः । तया मदन्तः सधमाद्येषु । वयग्ग् स्याम पतयो रयीणाम् । वैश्वानरो रश्मिभि–र्मा पुनातु । वातः प्राणेनेषिरो मयो भूः । द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् ॥

बृहद्भिः सवितस्तृभिः । वर्षिष्ठै–र्देवमन्मभिः । अग्ने दक्षैः पुनाहि मा । येन देवा अपुनत । येनापो दिव्यंकशः । तेनदिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति । ऋषिभि–स्संभृतग्ं रसम् । सर्वग्ं स पूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति । ऋषिभिस्संभृतग्ं रसम् । तस्मै सरस्वती दुहे । क्षीरग्ं सर्पि–र्मधूदकम् ॥ पावमानी–स्स्वस्त्ययनीः । सुदुघाहि पयस्वतीः । ऋषिभिस्संभृतो रसः । ब्राह्मणेष्वमृतग्ं हितम् । येन देवाः पवित्रेण । आत्मानं पुनते

सदा । तेन सहस्रधारेण । पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रम् । शतोद्यामगं हिरण्मयम् । तेन ब्रह्म विदो वयम् । पूतं ब्रह्म पुनीमहे । इन्द्रस्सुनीती सहमा पुनातु । सोमस्स्वस्त्या वरुणस्समीच्या । यमो राजा प्रमृणाभिः पुनातु मा । जातवेदा मोर्जयन्त्या पुनातु । भूर्भुवस्सुवः ॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी–स्स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शान्तिः शान्तिः शान्तिः ॥